नेनिंसकः-सिका ; [1]रमोष्ठनिंसी-[A] इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक-जिन्वतिवत् (604) ज्ञेयानि ।

## (680) "णीङ् प्रापणे" (I-भ्वादिः-901. सक. अनि. उभ.)

प्रापणम् = आसादनम् ।

नायकः-[B]परिणायकः-यिका, नायकः-यिका, [2]निनीषकः-षिका-नेनीयकः-यिका; नेता-त्री, [C]दुरितापनेत्री, नाययिता-त्री, निनीषिता-त्री ; अनुनयन्-न्ती, [गडुं][3]विनयन्, नाययन्-न्ती, निनीषन्-न्ती ; — नेष्यन्-न्ती-ती, नाययिष्यन्-न्ती-ती, निनीषिष्यन्-न्ती-ती ; [अजां ग्रामं] [4]नयमानः, [शास्त्रे] [5]नयमानः, [दण्डम्] उन्नयमानः,

---

1. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः ।
2. धातोरस्यानुदात्तत्वात्, 'एकाच उपदेशेऽनुदात्तात्' (7-2-10) इतीण्णिषेधे, 'इको झल्' (1-2-9) इति सनः कित्वात् न गुणः । 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
3. 'कर्तृस्थे चाशरीरे कर्मणि' (1-3-37) इत्यत्र शरीरावयवभिन्ने कर्मणि इति व्याख्यानात्, कर्तृगामिन्यपि क्रियाफले नात्मनेपदं शानज् भवति । अपि तु शतैव ।
4. 'नीङ्धातोः संयोगानुकूलव्यापारानुकूलव्यापारार्थकत्वेन 'कर्तुरीप्सिततमं कर्म' (1-4-49) इत्यनेनाजायाः प्रधानकर्मत्वम् । ग्रामस्य तु अप्रधानकर्मत्वमिति द्वितीयाप्रयोगः सङ्गच्छते । यद्वा, 'अकथितं च' (1-4-51) इत्यनेनाधारस्य ग्रामस्य तत्त्वाविवक्षायां कर्मसंज्ञा भवति, इति वा बोध्यम् ।
5. 'सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' (1-3-36) इत्यनेन क्रमेण सप्तस्वर्थेषु विषयभूतेषु आत्मनेपदं भवति—परगामिन्यपि क्रियाफले । **सम्माननम्** = पूजनम् । 'शास्त्रे नयमान' इत्यत्र शास्त्रबोध्यम् अर्थं शिष्येभ्यः प्रापयतीत्यर्थः । तेन शिष्यसम्माननं फलितम् । **उत्सञ्जनम्** = उत्क्षेपणम् । **आचार्यकरणम्** = आचार्यक्रिया । विधिना आत्मसमीपं प्रापयन् इत्यर्थः । **ज्ञानम्** = प्रमेयनिश्चयः । **भृतिः** = वेतनम् । भृतिदानेन स्वसमीपं प्रापयन् इत्यर्थः । **विगणनम्** = ऋणादेर्नियातनम् । राज्ञे देयं भागं परिशोधयन् इत्यर्थः । **व्ययः** = धर्मार्थं विनियोगः । धर्मार्थं शतं विनियुञ्जान इत्यर्थः ।

A. 'स्वीयैश्वकंसे कशनीयकासी **रमोष्ठनिंसी** नतचित्तनिञ्जी ॥' धा. का. 2.45.

B. 'अनुदेहमागतवतः प्रतिमां **परिणायकस्य** गुरुमुद्वहता ।' शि. व. 9.73, 9-73.

C. 'धूतप्रमोदो **दुरितापनेत्रीं** स्नातुं नदीमाप स गाम्दिनेयः ॥' धा. का. 2.29.